समस्यापूर्तिः, समस्यापादांशपूर्तिः, पादपूर्तिः, पादांशपूर्तिश्च

एस्.जगन्नाथः, मैसूरु

©jagannathas1956@gmail.com

१.समस्यापूर्तिः

१.लघुमपि कृमिमुज्झञ्छक्त्यभावाद् गृहीतं
परखगहसितानां लक्ष्यताम् आशु गत्वा।
अवमतिहततेजा निद्रितः स्वप्नदर्शी
निगिलति गजलक्षं चाटकैरः सलीलम्॥

[चाटकैरः- चटकायाः पोतः।पुमपत्ये चाटकैरः स्त्र्यपत्ये चटकैव सा इत्यमरः]

२.गीतोपदेशसमये समरोदयात् प्राक्
पार्थो मुकुन्दपरिदर्शितविश्वरूपः।
दृष्ट्वा सहस्रकिरणं सहसा जगाद
वह्निस्फुलिङ्ग इव भानुरयं चकास्ति॥

३. लुलायमतिभावुके नमति मत्तदन्तावले
शशप्रणतिकारके भवति सैरिभाधीश्वरे।
कृताखुभुगभिष्टुतौ हरिणयूथपे प्रायशो
बिडालकुलनायको जयति मूषिकाराधकः॥

४.आचार्यो यदि कोकिलस्य कटुवाग् दासेरकस्यार्भकः
सम्यग् डाययते मरालमथ चेत् खे मौकलेः शावकः।
गत्याश्चेद्विषये प्रवक्ति भषको मत्तावलं कानने
मार्जारस्य किशोरकोऽपि कुरुते विद्वत्समाराधनम्॥

५.मार्तण्डद्युतिनिचयाप्रवेश्यगाढे
कान्तारे कतिपयपेलवच्छदेभ्यः।
द्वित्रेषु च्छविषु सरोगतेषु हर्षान्
मध्याह्ने मुकुलितमम्बुजं वनान्ते॥

६.पीयूषं चेन्निसरत्युष्णरश्मेः
शीतांशोर्वाऽप्यग्निकीला कराला।
हर्षोत्कर्षो यादसां चेन्मरौ च
प्रायेण स्यात् सर्ववश्यः कृतान्तः॥

७.पारावारस्तीरवांस्तीरमार्द्रां
मृद्वीं चार्वीं वालुकां संबिभर्ति।
सेयं धत्ते स्वानुरूपं सखायं
शीताम्भोदं वालुका नारिकेलम्॥

२.समस्यापादांशपूर्तिः

८.सर्वे चर्वितचर्वणं किल कलौ कुर्वन्ति दुर्वादिनः
कौबेरद्रविणापहारपरकासद्भाषणैर्भीषणैः।
क्लेशाम्भोधिनिमज्जकात् पुरुतरप्रज्ञोदयो मानवान्
अत्यावश्यक-मात्र-रै-समधिकात् **पायादपायादपात्**॥

[पुरुतरा=अधिका।रैः=धनं।अ-पात्=पकारवर्जितात्।अपायात्= आयात् (धनागमात्)]

९.कल्लोलैर्जलधावतीवकुटिलैरुग्रैर्न कम्पो, न वा
गत्याश्च स्थगनं तरङ्ग-गण-भी-स्रष्ट्र्या महत्या इव।
नावो दार्ढ्यममोघबाणविसरैर्दैत्यान् द्रुतं धावयत्
किं न स्मारयति क्षणादजगवं ? **नौका पिनाकायते**॥

[अजगवं पिनाक इति द्वे नामनी शिवधनुषः।तरङ्गेष्वपि भीतिमुद्पादयित्र्या इव महत्या नौकायाः यदस्ति दार्ढ्यं, तत्, क्षणादेव दैत्यान् अपसारयत् शैवं धनुर्न स्मारयति किम् ?]

१०.अम्भोधौ चलनं द्रुतं विदधती कल्लोलमालाकुले
साम्राज्यं किमपीति विस्तृततरा भ्रान्तिं दृशोः कुर्वती।
पुष्पाढ्येन च नन्दनेन कृतकेनाश्चर्यमातन्वती
नानावस्तुभरा प्रयातृनिवहे **नौकाऽपि नाकायते**॥

३.पादपूर्तिः

११.श्रीमाधवस्निग्धकटाक्षरेखा-
पातस्फुरद्रम्यतमासितश्रीः।
किं प्रेयसी नापरगोपिका-हृत्-
साराधिका संप्रति राधिका सा॥

१२.किमिङ्ग्लीष्भाषया सृष्टैर्महाकोलाहलैर्न तत्।
संस्कृतस्यापमानाय **विश्वसंस्कृतमेलनम्**॥

३.पादांशपूर्तिः

१३.चूषित्वा नलिनीं मनोहररसां लोलातिलोल ! क्षणाद्
अन्यां सूचक! वीक्षसे सुमनसं रागान्मरन्दोज्झिताम्।
तुभ्यं न क्रुधमातनोमि मधुप! स्वल्पामपि प्राणिनाम्
ईदृक्षे व्यसने मनोज्ञमतिभिः **कार्या कृतघ्ने घृणा**॥

१४.एतन्मस्तकमस्तु मे नरपतिश्रेष्ठात्तसिंहासनं
यत्राहं सहसोपविश्य निखिलं राज्यं करोमि क्रमात्।
शीर्षं ते नमयेति वादिनमवालोक्यादराद् वत्सला
क्रीडाचेष्टितरम्यभावचटुलं **माता सुतं वन्दते**॥

१५.कालश्रेणी निरर्थैः क्षणनिमिषमुखाऽनेकसंवत्सराढ्या
मूर्खेणानल्पजल्पैः कथमपि गमिता क्षुद्रवार्ताविकल्पैः।
किन्तु क्रान्तावलोकस्फुरदुरुरसवत्काव्यनिर्माणधर्म-
प्रागल्भ्यैः संप्रमोदैरविहति कविना **साधुना साधु नीता**॥

१६. पारम्पर्यपरीक्षणाचणगणं नावीन्यनिष्ठव्रजं
व्याहारस्तव हे सुधीरुभयममप्यव्याहतं तर्पयन्।
नाश्चर्यं वितनोति तद्गतमहागाम्भीर्यविद् यो बुधः
स्तौति त्वामनघैर्वचोभिरिह स **स्तव्यस्तव स्तावकः**॥

१७.ग्लौबिम्बश्रीः सुन्दरास्यप्रभेव
व्योमच्छाया रम्यकेशच्छटेव।
ताराश्रेणी चारुमुक्तावलीव
स्वान्तप्रान्ते **यामिनी कामिनीव**॥

~~~~~~~~~~~~~~~~~~~~~~~~~~~~

एस्.जगन्नाथः, मैसूरु

©jagannathas1956@gmail.com
~~~~~~~~~~~~~~~~~~~~~~~~~~~~